**ऋणस्वीकृतिः**

**जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।**
**अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः[११] ।।**

सूक्तिमुक्तामिमामनुसृत्य परममोदावहेस्मिन्नवसर ऐदम्प्राथम्येन महतामभिवादनं विधित्सुः, अकारणकरुणान् मम मातृचरणान् पितृचरणान् जन्मप्रदातॄनभिवादयामि, पद्मश्रीविभूषितः डायाभाई शास्त्री (संस्थापकः- श्रीब्रह्मर्षिसंस्कारधाम-नडियादनगरम्) एतेषां वात्सल्यवारिधौ वरिवृत्त्यमानेनैव आबाल्याल्लब्धसंस्कारदीक्षेण पुत्रवल्लालितेन प्रथमात आचार्य्यकक्षापर्य्यन्तं लब्धशिक्षेणाभावि, तैरुपदिष्टमार्गमेवानुसरतैतेषां जीवनमन्त्रं मुद्रलेखं ध्येयवाक्यञ्च सार्थकीचिकीर्षुणा मम जन्मभूमावेव मधुकरवृत्तिना मधुकरवृत्तयः संसारपाशबद्धा जिज्ञासवो यावदधीतपरीक्षितज्ञानमधुरशीकरवृष्ट्या अभिषिच्यन्ते, अतस्तैर्ध्रुवमन्वग्राहिषि ।

**विद्वान् हरिप्रसादः प्रापञ्चाद्भुतश्रियम् ।**
**'काञ्चनमणिसंयोगः' उक्तिं चरितार्थयति ।।**
**विद्यागुरुमन्तरेण प्रक्रियेयं सदापूर्णा ।**
**हरिप्रसादवर्यस्याभारं दर्शयाम्यहम् ।।**

मम संशोधनकार्येस्मिन् विषयसम्बन्धितानामापदामपहरणाय तथा प्राप्ताप्राप्तग्रन्थानां प्रापणाय येषां सहयोगो मया प्राप्तस्तथा सुकार्येस्मिन् दिशादर्शकस्य मम डॉ. हरिप्रसाद पाण्डे (भूतपूर्वसंस्कृतविभागाध्यक्षः-

---

11 सु. र. भाण्डागारम् १७१।५४२

संस्कृतमहाविद्यालयः, वडोदरा) महाभागस्य चरणकमलेषु सादरं साश्रयं सविनीतं च प्रणामं करोमि, तेषामात्मीयतासभरेण व्यक्तित्वेनैव महासंशोधनकार्यमिदं पूर्णतां गतम् ।

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ।।**
**भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्भूमिविलम्बिनो घनाः ।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्**[१२] **।।**

समस्तविश्ववन्दिता पूजिता चेयं वसुन्धरानेकेषां सच्चरित्रवतामृषीणां पुरुषाणां च जननी । चरित्रवन्त ऋषयो वा चरित्रवन्तो महापुरुषाः स्वकीयेन पावनेन चारित्र्येण स्वज्ञानेन च पावयन्ति लोकान् , तेषु ( परमपूज्याः श्रीरामदासजी महाराजाः (संतराममन्दिरम्-नडियादनगरम्) तथा च परमपूज्याः १०८गोस्वामिनः श्रीद्वारकेशलालजी महाराजाः (कल्याणपुष्टिहवेली- बडौदानगरम्) परमपूज्याः १०८गोस्वामिनः श्रीहरिरायजीमहाराजाः (नाथद्वारा-इन्दोरनगरम्) एतेषां महापुरुषाणामशीर्भिरेवेदं सांख्यदर्शनं समुत्तरीतुं शक्नोमि, अतः परहितानामेतेषां चरणकमलयोरहं प्रणतीर्वितरामि ।

नव्यव्याकरणसाहित्यादिशास्त्रपारङ्गतानां विद्यादानदीक्षाव्रतिनां छात्रजीवनशिल्पिनाम्पूज्यानां श्रीगुरुवर्य्याणां श्रीरामपालशुक्लः (प्राध्यापकः- एम. एस. युनिवर्सिटी-बडौदानगरम् ) एवं डॉ. गौरीशङ्कर

---

[12] सु. भाण्डागारम् ७८।१०-११

जोषी (प्राध्यापकः, नव्यव्याकरणाचार्य्यः श्रीबाबडेश्वरसंस्कृतमहाविद्यालयः पोरबन्दरम् ) तथा च डॉ. कृष्णप्रसाद निरौला (भूतपूर्वप्राचार्य्यः-श्रीब्रह्मर्षिसंस्कारधाम-नडियादनगरम्) एतेषाञ्चरणेष्वनन्ताः प्रणामाः, यैरूहापोहक्षमाधीरुदपादि ।

'नास्ति मूलं कुतः शाखा' इत्यनुषज्य एम. एस. युनिवर्सिटी-बडौदा सर्वोप्ययं शोधप्रबन्धोपक्रमः शिवसङ्कल्पपरिपाकफलत्त्वेन परिकल्पितः, तं वाग्देवमन्दिरायमाणं एम. एस. युनिवर्सिटी-बडौदाया दर्शं दर्शं प्रेरणापुष्पं ग्राहं ग्राहं मुदा वावन्द्ये, येनायं विद्याव्यासङ्गावसरोदायि, अनुपदञ्च विश्वविद्यालयप्राणभूतान् सर्वानपि निष्ठावतोधिकारिणो भूयो भूयोवसरेस्मिन् अभिनन्दामि ।

अशेषं जानामि यत् - पुराणसाहित्यस्य क्षेत्रं विशालमपिरिमितञ्च वर्तते, तथापि शोधमहाप्रबन्धेस्मिन् 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति विषयनिबद्धं संशोधनविषये नवप्रकरणैर्विभूषितमिदं लेखनकार्यं भविष्यति पुराणजिज्ञासूनां जनानामपरेषां संस्कृताभ्यासूनां संस्कृतजिज्ञासूनां, समेषां सांख्यशास्त्रचिन्तकानां तृप्तिं काञ्चिच्छान्तां करिष्यति, तदैवाहमात्मधन्यतां गणयिष्यामि, तदैवायं संस्कृतसाहित्यस्य सेवावसरः सार्थको भविष्यति ।

**अदृश्यदोषान् मतिविभ्रमाद्वा**
**यत्किञ्चिदूनं लिखितं मया च।**
**तत्सर्वमार्यैः परशोधनीयं**
**कोपन्न कुर्यात् खलु शोधकस्य।।**

सोयं महता प्रयत्नेन सावधानतया च सम्पादितः शोधमहाप्रबन्धोयं भारतीयविदुषामिव पाश्चात्यानामपि विपश्चिदपश्चिमानां मनसः प्रीतये प्रपद्येतेति मनीषयैव गीर्वाणवाणीसपर्यापर्युत्सुकेनन, वाग्देवताचरणकमलचञ्चरीकया मया मौकुरीं श्रियमादधानः संस्कृतानुरागिणामनुरागाय मनः सन्तोषपोषाय च प्रकल्पेत, तर्हि प्रयत्नममुमात्मनः सुतरां फलेग्रहिमाकलयिष्यामीति शम् ।

**शोधकर्ता**

**गिरधरः बालकृष्णः उपाध्यायः**

दाहोदनगरम्